वरिष्ठः १२। अस्य गुणाः। मधुरत्वम्। अम्लत्वम्। गुरुत्वम्। उष्णत्वम्। रोचनत्वम्। वातामक्रमिशूलश्रमनाशित्वम्। बल्यत्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥ तत्केशरगुणाः।
"अत्यम्लमीषन्मधुरं हृद्यं वातविनाशनम्।
रुच्यं वातहरञ्चैव नागरङ्गस्य केशरम्॥"
इति राजवल्लभः॥

नारदः, पुं, (नारं परमात्मविषयकं ज्ञानं ददातीति। दा+कः। यद्वा, नारं नरसमूहं द्यति खण्डयति कलहेनेति। दो+कः। नारं जलं ददाति पितृभ्य इति वा। तदुक्तम्,—
"नारं पानीयमित्युक्तं तत् पितृभ्यः सदा भवान्।
ददाति तेन ते नाम नारदेति भविष्यति॥")
देवर्षिविशेषः। स तु भोगाशी ब्रह्मशापादुपबर्हणनामा गन्धर्व्वो भूत्वा पुनर्ब्रह्मवीर्य्यात् शूद्रपत्न्यां जातः। यथा,—
शौनक उवाच।
"ब्रह्मवीर्य्याच्छूद्रपत्न्यां गन्धर्व्वश्चोपबर्हणः।
जातः केन प्रकारेण तद्भवान् वक्तुमर्हति॥
सौतिरुवाच।
कान्यकुब्जे च देशे च द्रुमिलो गोपराजकः।
कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता॥
स्वामिदोषेण सा वन्ध्या काले च भर्त्तुराज्ञया।
उपस्थितं वने घोरे नारदं काश्यपं मुनिम्॥
क्रोशमानञ्च श्रीकृष्णं ज्वलन्तं ब्रह्मवर्च्चसा।
तस्थौ सुवेशं कृत्वा सा ध्यानान्तञ्च मुनेः पुरः॥
उवाच विनयेनैव कृत्वा च श्रीहरिं हृदि।
गोपिकाहं द्विजश्रेष्ठ! द्रुमिलस्य च कामिनी।
पुत्त्रार्थिनी चागताहं तन्मूलं भर्त्तुराज्ञया॥
वीर्य्याधानं कुरु मयि! स्त्री नोपेक्ष्या ह्युपस्थिता।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा॥
वृषलीवचनं श्रुत्वा चुकोप मुनिपुङ्गवः।
वृषली तत्पुरस्तस्थौ शुष्ककण्ठौष्ठतालुका॥
एतस्मिन्नन्तरे तेन पथा यास्यति मेनका।
तस्या ऊरुस्थलं दृष्ट्वा मुनिर्वीर्य्यं पपात ह॥
ऋतुस्नाता च वृषली कृत्वा तद्भक्षणं मुदा।
सा विप्र! गेहे साध्वी च सुषुवे तनयं वरम्॥
तप्तकाञ्चनवर्णाभं ज्वलन्तं ब्रह्मतेजसा।
अनावृष्ट्यवशेषे च काले बालो बभूव ह॥
नारं ददौ जन्मकाले तेनायं नारदाभिधः॥
ददाति नारं ज्ञानञ्च बालकेभ्यश्च बालकः।
जातिस्मरो महाज्ञानी तेनायं नारदाभिधः॥
वीर्य्येण नारदस्यैव बभूव बालको मुने!।
मुनीन्द्रस्य वरेणैव तेनायं नारदाभिधः॥
कल्पान्तरे ब्रह्मकण्ठाद्बभूवुर्बहवो नराः।
नरान्ददौ तत्कण्ठश्च तेन तन्नारदः स्मृतः॥
ततो बभूव कालश्च नारदात् कण्ठदेशतः।
ततो ब्रह्मा नाम चक्रे नारदश्चेति मङ्गलम्॥
एतस्मिन्नन्तरे विप्रा आययुर्विप्र मन्दिरम्।
शिशवः पञ्चवर्षीया महातेजस्विनो यथा॥
चतुर्व्वेको मुनिस्तस्मै ब्राह्मणाश्च कृपालवः।
ब्रह्मपुत्त्रं शिशुं ज्ञात्वा विष्णुमन्त्रं ददौ मुदा॥
महाज्ञानी शिशुस्तस्थौ गङ्गातीरे मनोहरे।
तत्र स्नात्वा विप्रदत्तं विष्णुमन्त्रं जजाप सः॥
दिव्यं वर्षसहस्रञ्च निराहारः कृशोदरः।
ददर्श बालको ध्याने दिव्यं लोकञ्च बालकम्॥
द्विभुजं मुरलीहस्तञ्चन्दनेन विचर्च्चितम्।
विरराम च शोकार्त्तो यदा यदृष्टमच्युतः॥
ररोदाश्वत्थमूले च न दृष्ट्वा बालकं शिशुः।
बभूवाकाशवाणीति ररक्तं बालकं प्रति॥
सकृद्यद्दर्शितं रूपं तदेव नाधुना पुनः।
पुनर्द्रक्ष्यसि गोविन्दं जन्मन्त्युहरं हरिम्॥
इति श्रुत्वा बालकश्च विरराम मुदान्वितः।
काले तत्याज तीर्थे च तनुं कृष्णं हृदि स्मरन्॥
बभूव शापमुक्तिश्च नारदस्य महामुने!।
तनुं त्यक्त्वा स जीवश्च विलीनो ब्रह्मविग्रहे॥
कतिकल्पान्तरेऽतीते स्रष्टुं सृष्टिविधौ पुनः।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः॥
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २१—२२ अध्यायौ॥
तस्य सर्व्वदा भ्रमणकारणं यथा,—
"तांश्चापि नष्टान् विज्ञाय पुत्त्रान् दक्षप्रजापतिः।
क्रोधञ्चक्रे महाभाग! नारदं स शशाप च॥"
नारदशापश्च श्रीभागवतोक्तः।
"तस्माल्लोकेषु ते मूढ़ न भवेद्भ्रमतः पदम्।"
इति विष्णुपुराणे १ अंशे १५ अध्यायस्तट्टीका च॥ (पञ्चविंशतिसहस्रश्लोकात्मक उपपुराणविशेषः। यथा, देवीभागवते। १। ३। ८।
"षोडशैव सहस्राणि पुराणञ्चाग्निसंज्ञितम्।
पञ्चविंशतिसाहस्रं नारदं परमं मतम्॥"
शाकद्वीपस्य पर्व्वतविशेषः। यथा, मात्स्ये। १२१। ११।
"नारदो नाम चैवोक्तो दुर्गशैलो महाचितः।
तत्राचले समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ॥"
विश्वामित्रपुत्त्रविशेषः। यथा, महाभारते। १३। ४। ५८।
"उर्व्वयोनिरुदापेक्षी नारदश्च महानृषिः।
विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः॥")

नारा, स्त्री, (नरस्य मुनेरियम्। नर+"तस्येदम्।" ४। ३। १२०। इति अण्। ततष्टाप्। "यद्यपि अणि कृते ङीप्प्रत्ययः प्राप्तस्तथापि छान्दसलक्षणैरपि स्मृतिषु व्यवहारात् सर्व्वे विधयश्छन्दसि विकल्प्यन्ते इति पाक्षिको ङीप् प्रत्ययः। तस्याभावपक्षे सामान्यलक्षणप्राप्तेटापि कृते नारा इति रूपसिद्धिः।" इति मनुसंहिताटीकायां कुल्लूकभट्टः।१।१०।) जलम्। इति शब्दरत्नावली॥ (यथा, मनुः। १। १०।
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः॥")

नाराचः, पुं, (नारं नरसमूहं आचामतीति। चमु अदने+"अन्येष्वपि दृश्यते।" ३।२।१०१। इति डः।) समुदायलौहमयवाणः। तत्पर्य्यायः। प्रक्ष्वेड़नः २। इत्यमरः। २। ८। ८७॥ लौहनालः ३। इति शब्दरत्नावली॥ (यथ", वृहत्शार्ङ्गधरे।
"सर्व्वलौहास्तु ये वाणा नाराचास्ते प्रकीर्त्तिताः।
पञ्चभिः पृथुलैः पक्षैर्युक्ताः सिध्यन्ति कस्यचित्॥")
दुर्द्दिनम्। इति शब्दमाला॥ (अष्टादशाक्षरवृत्तिविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥ वैद्यकोक्तघृतविशेषः। यथा, भावप्रकाशे उदररोगाधिकारे।
"स्नुक्क्षीरदन्तीत्रिफलाविड़ङ्ग-
सिंहीत्रिवृच्चित्रकसर्षपकल्कैः।
घृतं विपक्वं कुड़वप्रमाणं
तोयेन तस्याक्षसमेन कर्षम्॥
पीतोष्णमम्भोऽनुपिवेद्विरेके
पेयं रसं वा प्रपिबेद्विधिज्ञः।
नाराचमेनं जठरामयानां
सुक्तं प्रयुक्तं प्रवदन्ति सन्तः॥"
इति नाराचघृतम्॥ *॥)

नाराचिका, स्त्री, (नाराचस्तदाकारोऽस्त्यस्या इति। नाराच+ठन्। टाप्।) नाराची। इति शब्दरत्नावली॥ (अष्टाक्षरवृत्तिविशेषः। तल्लक्षणं यथा,—
"नाराचिका तरौ लगौ॥")

नाराची, स्त्री, (नाराचवदाकृतिरस्त्यस्या इति। अच्। गौरादित्वात् ङीष्।) स्वर्णकारादीनां नाराचाकृतिलौहतुला। निक्ति इति भाषा। तत्पर्य्यायः। नाराचिका २ एषणिका ३ एषणी ४। इति शब्दरत्नावली॥

नारायणः, पुं, (नारा जलं अयनं स्थानं यस्य। अय गतौ+भावे ल्युट्। सर्व्वे गत्यर्थाः प्राप्त्यर्थाश्च इति नियमात् नारस्य ज्ञानस्य मुक्तेर्वा अयनं प्राप्तिर्यस्मात् इति वा। "नराणां समूहो नारं तत्रायनं स्थानं यस्य नारायणः रेफात् परनकारस्य णत्वविधानात् सर्व्वप्राणिबुद्धिगुहानिवासाच्छुद्धचैतन्यमित्यर्थः।" इति शङ्करविजये नवमप्रकरणम्।) विष्णुः। तस्य चत्वारो व्यूहाः। वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्याः। इति महाभारतम्॥ वेदान्तमते। शुद्धान्तर्य्यामिसूत्रविराड़ाख्याः॥ तन्नामव्युत्पत्तिर्यथा,—
"सारूप्यमुक्तिवचनो नारेति च विदुर्बुधाः।
यो देवोऽप्ययनं तस्य स च नारायणः स्मृतः॥
नाराश्च कृतपापाश्चाप्ययनं गमनं स्मृतम्।
यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः॥
नारश्च मोक्षणं पुण्यमयनं ज्ञानमीप्सितम्।
तयार्ज्ञानं भवेद्यस्मात् सोऽयं नारायणः स्मृतः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०८ अः॥
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः॥"
इति विष्णुपुराणम्॥
यद्वा।
"नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः।
तान्येव चायनं तस्य तेन नारायणः स्मृतः॥"